इष्टियाजकः इष्टियजनशीलः इष्टिशब्देन काम्या इष्टयः शातपथप्रसिद्धाः ताच्छील्ययोगात्काम्येष्टि यजनप्रधानोन स्यात्" भा० ।

**इष्टीकृत** त्रि० अनिष्टमिष्टं कृतम् इष्ट+च्वि-कृ-कर्मणि क्त । अनिष्टे इष्टे कृते। अनिष्टिरिष्टिः कृता । इष्टिभेदे सत्रे न०। "सत्रमिष्टीकृतं नाम समुपास्ते महातपाः" भा०व०२५९अ०

**इष्टु** स्त्री इष-भावे तुन् । इच्छायाम् उणादिकोषः ।

**इष्ट्ययन** न० इष्ट्यायनं गमनं यत्र । "यागविशेषाचरणभेदे" इष्ट्ययनञ्च आश्व० श्रौ०२,१४, सूत्रादौ दर्शितं यथा "अत ऊर्द्धमिष्ट्ययनानि"१।"अत ऊर्द्धं यानि वक्ष्यन्तेऽस्मिन् अध्याये तानि इष्ट्ययनसंज्ञानीति विद्यात् । इष्टिभिरयनं गमनं येषु कर्म[illegible]तानीष्ट्ययनानि" नारा०वृ० । "सांवत्सरिकाणि"२सू०।"संवत्सरेण क्रियन्ते संवत्सरैः क्रियन्त इत्युभयथा विग्रहः कर्त्तव्यः,दाक्षायणयज्ञचातुर्मास्यानामनेकसांवत्सरिकत्वसिद्ध्यर्थम् वृ०।"तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः"३सू०।"फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी, चित्रया युक्ता चैत्री । तेषां सांवत्सरिकाणां आगन्तुकानामस्मिन् काले प्रारम्भः कार्यः । दर्शपूर्णमासगुणविकाररूपाणां दाक्षायणयज्ञादीनामारम्भे कालनियमो नास्तीति तेषामित्युच्यते" नारा०वृ०। "तुरायणम्"४सू०।"तुरायणं नामेष्ट्ययनमुच्यते"वृ०।"अग्निरिन्द्रो विश्वेदेवा इति पृथगिष्टयोऽनुसवनमहरहः"५सू० ।"अग्निदेवत्या इन्द्रदेवत्या विश्वदेवदेवत्या चैतास्तिस्र इष्टयः त्रिषु सवनेषु यथासङ्ख्येन एकैकेष्टिः कार्याऽहन्यहनि । अहरहरिति वचनं पौर्णमासमावास्ययोर्बाधनार्थम्" वृ०। "एका वा त्रिहविः" ६सू०"एताभिरेव देवताभिर्युक्ता एकैवेष्टिस्त्रिहविष्काऽहन्यहनि प्रातः सवन एव कर्त्तव्या वेत्यर्थः" वृ०। "इडादधोनामेष्ट्ययनं तत्र देवतादि २।१४।१-१०" द्यावापृथिव्योरयनं नामेष्ट्ययनं तत्र देवतादि २,१४,१२,१५" "चातुर्मास्यानि इष्ट्ययनानि तद्देवतादि २,१५,१ सूत्रादौ । एवमन्यान्यपि इष्ट्ययनकर्म्माणि आकरे दृश्यानि

**इष्ट्वा** अव्य० यज-क्त्वा । १यागं कृत्वेत्यर्थे । "अश्वमेधेन चेष्ट्वा" मृच्छकटिकम् । इष-क्त्वा । २अभिलष्येत्यर्थे च ।

**इष्म** पु० इष्यति इच्छत्यनेन वा इष-गतौ इष-इच्छायां मक् वा । १वसन्तकाले २कामे च भावे मक् ।३गतौ । ततः अस्त्यर्थे इनि । इष्मिन् गतियुक्ते त्रि०स्त्रियां ङीप् ।"ते वाशीमन्त इष्मिणो अभीरवः" ऋ० १,८७,६। "इष्मिणः गतिमन्तः"भा०। इष-इच्छायां कर्म्मणि मक् ।४इष्यमाणे अन्नादौ अस्त्यर्थे इनि अन्नादिमति "हिरण्ययाः स्वायुधास इष्मिणः"ऋ०५,८,७५। इष्मिणोऽन्नवन्तः"भा० ।

**इष्य** पु० इष्यते इष-क्यप् । वसन्ते ऋतौ हेम० । तस्य ऋतूनां मध्ये इष्टतमत्वात्तथात्वम्"ऋतूनां कुसुमाकरः" गीतायां तस्य भगवद्रूपत्वोक्तेः इष्टत्वम् ।

**इष्व** पु० इष-सर्पणे वन्-गुणाभावः । आचार्य्ये उद्देशार्थमुपलक्ष्यमाणत्वात्तथात्वम्। उज्ज्वलदत्तस्तु ईष दाने इत्यस्यैव रूपं दीर्घादि इत्याह। उपदेशदानाच्च तस्य तथात्वम् ।

**इष्वग्र** न०६त०। वाणाग्रे । गहादिपाठात् भवादौ छ । इष्वग्रीय तद्भवादौ त्रि०। [इष्वनीकीय तद्भवादौ त्रि०।

**इष्वनीक** न० ६त० । वाणावयवे । गहा० भवादौ छ ।

**इष्वसन** पु०इषवोऽस्यन्ते क्षिप्यन्तेऽनेन अस-क्षेपे करणे ल्युट् ६त०। धनुषि ।"राममिष्वसनदर्शनोत्सुकम्" रघुः ।

**इष्वास** पु० इषवोऽस्यन्तेऽनेन अस-क्षेपे करणे घञ् ६त० । १धनुषि "अत्र शूरा महेष्वासाभीमार्ज्जुनसमा युधि" "काश्यश्च परमेष्वासः शिखण्डी च महारथः"गीता । अर्द्धर्चादिपाठात् क्लीवत्वमपि । इषून् अस्यति अस-अण् उप०स० । २शरक्षेपके त्रि०(तीरन्दाज) मेदि० ।

**इस्** अव्य० इं कामम् स्यति सो-क्विप् नि० आलोपः । १सन्तापे २कोपे ३दुःखानुभवे च शब्दर० ।

**इह** अव्य० इदम्+ह इशादेशः । अस्मिन् काले देशे दिशि वा १इत्यर्थे "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" श्रुतिः "इह जन्मनि जन्मान्तरे वा" वे०सा०। "नेह नाम्रुत किञ्चन" "नेहाभिक्रमनाशोऽस्ति" गीता । "तदखिलमिह भूतं भूतगत्या जगत्याः" नैष०। प्रथमार्थे ह । २अनुभूयमाने लोके इहामुत्रार्थफलभोग विरागः वेदा० सा० च इहकालः । इह भवः विदितोवा कर्षा० ठञ् । ऐहिक इहभवे इहविदिते च त्रि० । "ऐहिकब्रह्मघ्नपतेदोहादिनिषेधात्" मु०त०रघु०। [ मानकाले ।

**इहकाल** पु०इदम्+प्रथमार्थे ह इह कर्म्म०। एतत्काले वर्त्त-

**इहतन** त्रि० इहभवं ट्यु,तुट् च ।इहभवे स्त्रियां ङीप् ।

**इहत्य** त्रि० इह भवः इह+त्यप् । इहकालादिजाते । स्वार्थे कन् । इहत्यक तत्रार्थे स्त्रियां नित्यमित्त्वम् । इहत्यिका

**इहद्वितीया** स्त्री मयू०स० । अत्रत्य द्वितीयायाम् ।

**इहपञ्चमी** स्त्री । मयू०स० । अत्रत्य पञ्चम्याम् ।

**इहल** पु० इह भवं लाति ला-क । चेदिदेशे त्रिका० तद्वासिनि ब०व० ।

**इहलोक** पु० इदम्-प्रथमार्थे ह कर्म्म० । एतल्लोके व्यलु-